दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-167 | 1 | अप्रैल 09, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखकृष्णसप्तमी
चैत्र 26 प्रविष्ठांशः मङ्गलमयः भवेत्

2 उत्तम-चिकित्सार्थं आयुर्विज्ञान-महाविद्यालयेषु वर्धिष्यन्ते 'पीजी'-आसनानि - मुख्यमन्त्री सुक्खू

3 शैक्षणिक-भ्रमणानि छात्रान् जीवन्त-इतिहासेन सह साक्षात् कारयन्ति- आचार्यः ललितकुमार अवस्थी

4 हिमाचलप्रदेशे विलम्बित-अतिरिक्तराशेः (Arrear), चिकित्सा-विधेयकानां च भुक्तिः शीघ्रं भविष्यति, वित्तविभागेन शीघ्रनिस्तारणाय निर्देशाः दत्ताः

## सर्वकारेण फ़ास्क्रैटिक् तथा पोटैशिक्-उर्वरकयोः कृते अस्य वर्षस्य ग्रैष्मिक इति खरिफ-सस्यानां कृते पोषक-आधारित अनुदान-मूल्यानि अनुमोदितानि



सर्वकारेण फ़ास्क्रैटिक् तथा पोटैशिक-उर्वरकयोः कृते अस्य वर्षस्य ग्रैष्मिक इति खरिफ-सस्यानां कृते पोषक-आधारित अनुदान-मूल्यानि अनुमोदितानि। नवदेहल्यां प्रसारमाध्यमान् सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः अवदत् यत् अस्यवर्षस्य खरीफ-सत्रस्य कृते प्रायः सार्ध-एकचत्वारिंशत्सहस्र कोटि-रूप्यकाणां तात्कालिक-आयव्ययकेत्यस्य आवश्यकता भविष्यति। सः अवदत् यत्, अनेन कृषकाणां कृते सुलभमूल्येन उर्वरकानां उपलब्धता सुनिश्चितं भविष्यति। प्रहलादपुरातः टोडी-मोड-पर्यन्तं एकचत्वारिंशत् किलोमीटर-सुदीर्घस्य जयपुर-मेट्रो-फेज-द्वितीयस्यापि सर्वकारेण अनुमोदनं कृतम्। श्रीवैष्णवः अवदत् यत् अस्मिन् षड्त्रिंशत् स्थानकानां समावेशः भविष्यति तथा च अस्यां परियोजनायां त्रयोदश सहस्रकोटिरूप्यकाणां व्ययः भविष्यति। एषा परियोजना राजस्थान-मेट्रो-रेल्-कार्पोरेशन्-लिमिटेड् इत्यनेन कार्यान्वितम् भविष्यति, यत् भारतसर्वकारस्य राजस्थानसर्वकारस्य च समान-संयुक्त उद्यमः अस्ति।

## अमेरिका-इरान-देशयोः मध्ये जातस्य सन्धेः भारतेन स्वागतं कृतम्

अमेरिका-इरान-देशयोः मध्ये जातस्य सन्धेः भारतेन स्वागतं कृतम्। एकस्मिन् वक्तव्ये, विदेशमन्त्रालयेन आशा प्रकटिता यत् अनेन पश्चिम-एशियादेशे चिरस्थायी शान्तिः, होर्मुज़-जलसंधिना नौवहनस्य निर्बाध आवागमनं, वाणिज्यस्य वैश्विकप्रवाहः च भविष्यति। मन्त्रालयः अवदत् यत् भारतं निरन्तरं युद्धविरामाय, संवादं, कूटनीतिं च समर्थयति, यत् संघर्षस्य शीघ्रसमाप्त्यर्थं आवश्यकम् अस्ति। मन्त्रालयेन अग्रे उक्तं यत्, विवादेन पूर्वमेव जनेषु महती क्लेशः अभवत्, वैश्विक-ऊर्जा-आपूर्तिः, व्यापारजालानि च बाधिताः अभवन्। अत्रान्तरे, इरान-देशस्य स्थित्यानुसारं इरानदेशे भारतीय-दूतावासेन, सम्प्रति इरानदेशे स्थितेभ्यः भारतीय-नागरिकेभ्यः, दूतावासेन सह समन्वयेन, दूतावासेन सूचितान् मार्गान् उपयुज्य, इरान-देशात् शीघ्रं निर्गन्तुं सूचितम् अस्ति। परामर्शपत्रे उक्तं यत् दूतावासेन सह पूर्वपरामर्शनं समन्वयेन च विना कस्यापि अन्ताराष्ट्रिय-स्थलसीमायां प्रविष्टुं प्रयासः न करणीयः। अत्रान्तरे, आधिकारिक-सुचनानां स्थितिं निकटतया निरीक्षितुं भारतीयनागरिकान् दुतावासेन उक्तम्। + 989128109115, +989128109109,+ 989128109102 तथा + 989932179359 इति चरदूरभाष सङ्ख्यासु दूतावासेन सह सम्पर्कं कर्तुं शक्यते। दूतावासस्य ईमेलः संकेतः अस्ति अस्ति। Cons. Tehran@mea.gov.in इति वर्त्तते इत्यत्रापि सम्पर्कं कर्तुं शक्यते।।

## प्रधानमन्त्री-मुद्रायोजना यूनां मध्ये स्वजीविकोपार्जनं संवर्धनार्थं अत्यधिकं लाभप्रदं सिद्धम् च अस्ति - प्रधानमन्त्री नरेन्द्रमोदी




प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम् यत् प्रधानमन्त्री-मुद्रायोजना यूनां मध्ये स्वजीविकोपार्जनं संवर्धनार्थं अत्यधिकं लाभप्रदं सिद्धम् च अस्ति। पञ्चदशधिक-द्विसहस्र-तमे वर्षे आरब्धा इयं योजना एकादश वर्षाणि पूरयति। सामाजिक-माध्यम-संदेशे श्रीमोदी अवदत् यत् योजनायाः सफलतया ज्ञायते यत् यदा जनान् समुचितानि अवसराणि दीयन्ते तदा ते स्वावलम्बी भवितुं शक्नुवन्ति, राष्ट्रस्य प्रगतेः कृते महत्त्वपूर्णं योगदानं च दातुं शक्नुवन्ति। अद्यावधिः प्रधानमन्त्री-मुद्रा-योजनायाः अन्तर्गतं प्रायः अष्टपञ्चाशत् कोटिरूप्यकाणां ऋणानि स्वीकृतानि सन्ति। ऋणस्य तृतीयांशद्वयम् महिला उद्यमिनां कृते स्वीकृतम् अस्ति। सर्वेषु ऋणेषु प्रायः पञ्चमांशभागः प्रथमवारं नवोद्यमीनां कृते प्रदत्तः अस्ति। मुद्रा-ऋणानि 'शिशु, किशोर, तरुण, तरुण-प्लस' चेत्यादिष' चतुर्वर्गेषु प्रदत्ताः सन्ति, येन ऋणग्रहीतानां वृद्धेः, विकासस्य, वित्तपोषणस्य च आवश्यकता ज्ञायन्ते।

## सम्पूर्णे देशे खनन क्षेत्रेषु, ऊर्जा केन्द्रेषु च कृष्णाङ्गरस्य पर्याप्तः भण्डारः वर्तते - अङ्गारमन्त्रालयस्य संयुक्तसचिवः।

पश्चिम-एशिया-द्वन्द्वस्य मध्ये, सम्पूर्णे देशे खनन क्षेत्रेषु, ऊर्जा केन्द्रेषु च कृष्णाङ्गारस्य पर्याप्तः भण्डारः वर्तते इति प्रशासनेन दृढीकृतम्। नवदिल्ल्यां पश्चिम-एशियायाः वर्तमान स्थित्याम् अन्तामन्त्रालयीय-विवरणं सम्बोधयन् अङ्गारमन्त्रालयस्य संयुक्तसचिवः सञ्जीवकुमारकस्सी इत्येषः अवदत् यत् अङ्गारस्य मूल्ये वृद्धिः नाभवत्। पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य संयुक्तसचिवा सुजाता शर्मा इत्येषा अवदत् यत्, सम्पूर्णे देशे एल.पी.जी., पेट्रोल, डीज़ल् इन्धनानि पर्याप्तमात्रायां उपलभ्यन्ते, सामान्या आपूर्तिः अपि प्रचलति ।

## विज्ञान-प्रौद्योगिकी मन्त्री डॉ. जितेन्द्र सिंहः 'राष्ट्रीय क्वांटम मिशन' इत्यस्य प्रगतेः समीक्षां कृतवान्

विज्ञान-प्रौद्योगिकी मन्त्री डॉ. जितेन्द्र सिंहः 'राष्ट्रीय क्वांटम मिशन' इत्यस्य प्रगतेः समीक्षां कृतवान्, भारतस्य क्वांटम-प्रौद्योगिकी सम्बन्धिनीनां महत्त्वाकांक्षाणां विषये एकस्याः महत्त्वपूर्णायाः उपलब्धेः विषये च सूचितवान्। अधिकारिभिः उक्तं यत् मिशन-प्रारम्भात् वर्षद्वयात् न्यूनसमये एव एकसहस्र (१०००) किलोमीटर दीर्घः 'क्वांटम संचार नेटवर्क' इत्यस्य सफलतया प्रदर्शनं कृतम्, यत् विश्वस्य दीर्घतम-नेटवर्केषु अन्यतमम् अस्ति। एकेन स्टार्टअप-संस्थया स्वदेशी-तकनीकी-प्रयोगेण विकसितः अयं नेटवर्कः, अष्टवर्षेषु द्विसहस्र (२०००) किलोमीटर लक्ष्यं प्राप्तुं दिशि महतीं प्रगतिं सूचयति।

## सुभाषितम्

**अज्ञश्चाश्रद्दधानश्च, संशयात्मा विनश्यति।**
**नायं लोकोऽस्ति न परो, न सुखं संशयात्मनः॥**

भावार्थः:- विवेकहीन, श्रद्धारहित और संशययुक्त मनुष्य (परमार्थ से) भ्रष्ट हो जाता है। उस के लिए यह लोक सुखप्रद है और न परलोक ही।




## अद्य असम-केरल-केन्द्र-शासितपुदुचेरी-प्रदशेषु विधानसभा निर्वाचनाय मतदानं भविष्यति

असम-केरल-केन्द्रशासितपुदुचेरी-प्रदशेषु विधानसभा निर्वाचनाय सर्वाः सज्जताः सम्पन्नाः जाताः। असमराज्ये षड्विंशत्यधिक-शत्-आसनानां कृते, केरलं-राज्ये चत्वारिंशदधिक-शत्-आसनानां कृते, पुदुचेरी-राज्ये च त्रिंशत्-आसनानां कृते निर्वाचनं भविष्यति। स्वतन्त्रं, निष्पक्षं, शान्तियुतं च मतदानं निश्चेतुं सुरक्षाव्यवस्थाः दृढीकृतानि, प्रशासनिक-उपायानि च प्रयुज्यन्ते। एतदतिरिच्य, तमिलनाडुराज्ये एकचरणीय मतदानस्य, पश्चिमबंगालराज्ये च प्रथमचरणस्य मतदानस्य नामाङ्कनपत्राणां प्रत्यावर्तनस्य अद्य अन्तिमः दिवसः अस्ति। पश्चिमबङ्गालराज्ये द्वितीयस्य चरणस्य नामाङ्कनपत्रस्य कृते अपि अद्यैव अन्तिमः दिवसः वर्तते।

# उत्तम-चिकित्सार्थं आयुर्विज्ञान-महाविद्यालयेषु वर्धिष्यन्ते 'पीजी'-आसनानि - मुख्यमन्त्री सुक्खू




**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खू महोदयः उक्तवान् यत् आयुर्विज्ञान-महाविद्यालयेषु स्नातकोत्तर-स्तरे (PG) आसनानि वर्ध्यन्ते। टाण्डा-आयुर्विज्ञान-महाविद्यालये ५७, नेरचौक-महाविद्यालये २९, नाहन-महाविद्यालये ३२, चम्बा-महाविद्यालये ३३, हमीरपुर-महाविद्यालये ६७ तथा च आईजीएमसी (IGMC) मध्ये ९६ 'पीजी' आसनानि वर्धिष्यन्ते। सः अवदत् यत् आसनानां वृद्धेः अनन्तरं एतेषां महाविद्यालयानां कार्यप्रणाल्यां गतिः आगमिष्यति, रोगिभ्यः च उत्तम-चिकित्सा-सुविधाः उपलब्धाः भविष्यन्ति। मुख्यमन्त्रिणा इयं सूचना बुधवासरे स्वास्थ्य-शिक्षा-विभागस्य समीक्षागोष्ठ्याः अध्यक्षतां कुर्वता दत्ता। सः अवदत् यत् राज्यसर्वकारः प्रदेशे एव श्रेष्ठाः स्वास्थ्यसुविधाः प्रदातुं निरन्तरं प्रयत्नशीलः अस्ति।

मुख्यमन्त्रिणा नूतन-आयुर्विज्ञान-महाविद्यालयेषु प्राध्यापकानां तथा टाण्डा-महाविद्यालये 'सुपर-स्पेशलिस्ट' वैद्यानां न्यूनतां दृष्ट्वा आगामीनां त्रयाणां वर्षाणां कृते तेषां सेवानिवृत्ति-आयुः ६५ वर्षाणि कर्तुं निर्दिष्टम्। सः स्पष्टीकृतवान् यत् सेवानिवृत्ति-आयुः वर्धनेन कस्यापि स्तरे पदोन्नतिः (Promotion) प्रभाविता न भविष्यति। सहायक-सहप्राध्यापकानां (Assistant and Associate Professors) न्यूनतां मत्वा राज्यसर्वकारः तान् 'डेजिग्नेट' (Designate) करोति।

वर्तमानसर्वकारस्य प्राथमिकता आयुर्विज्ञान-महाविद्यालयानां सर्वेषां विभागानां सुदृढीकरणम् अस्ति, विशेषतः निदान-सुविधाः (Diagnosis) अधिकाः बलिन्यः भविष्यन्ति। अस्मिन् वर्षे नवम्बर-मासं यावत् सर्वेषु महाविद्यालयेषु परिचारिकाणां (Nurses) रिक्तपदानि पूरयिष्यन्ते, प्राविधिक-कर्मचारिवृन्दः अपि पर्याप्तसंख्यायां उपलब्धः भविष्यति। राज्यसर्वकारः ३,००० कोटि-रूप्यकाणां व्ययं कृत्वा सर्वेषु चिकित्सालयेषु आधुनिकानां यन्त्राणां उपकरणानां च क्रयणं करोति।

सुक्खू-महोदयः उक्तवान् यत् स्वास्थ्य-शिक्षा-क्षेत्रयोः परिष्कारः सर्वकारस्य प्राथमिकता अस्ति, तदर्थं धनस्य कापि न्यूनता नास्ति। आगामिषु वर्षेषु स्वास्थ्यक्षेत्रे अभूतपूर्वः सुधारः भविष्यति, येन प्रदेशे स्वास्थ्य-पर्यटनम् ('हेल्थ-टूरिज्म') अपि प्रवर्धनं प्राप्स्यति। सः अवदत् यत् सर्वकारः शीघ्रमेव चम्बा-महाविद्यालयस्य द्वितीय-चरणस्य कार्यं प्रारप्स्यते, यस्मिन् १९२ कोटि-रूप्यकाणां व्ययः भविष्यति। सहैव नाहन-महाविद्यालयस्य निर्माणार्थं सर्वकारः ५०० कोटि-रूप्यकाणि प्रदास्यति। अस्मिन् उपवेशने स्वास्थ्यमन्त्री डॉ. (कर्नल) धनीरामशाण्डिलः, स्वास्थ्यसचिवः एम. सुधा देवी, स्वास्थ्य-शिक्षा-निदेशकः डॉ. राकेशशर्मा तथा सर्वेषां महाविद्यालयानां प्राचार्याः आभासीय-माध्यमेन (Virtual) उपस्थिताः आसन्।

# बालिकानां विदेशयात्रायै एचपीवी (HPV) प्रमाण-पत्रं अनिवार्यं नास्ति





हिमसंस्कृतवार्ताः -शिमला। राष्ट्रियस्वास्थ्यमिशनस्य (NHM) एकेन वक्तृणा अत्र सूचितं यत् कानिचन समाचाराणां सामाजिकमाध्यमानां च माध्यमेन एचपीवी-सूच्यौषधं (Vaccine) अधिकृत्य भ्रामिकाः निराधाराश्च सूचनाः प्रसारिताः भवन्ति, यासु एषः विश्वासः कृतः अस्ति यत् एचपीवी-टीकाकरणं विना पुत्रीणां विदेशयात्रा सम्भवा न भविष्यति तथा च अस्य कृते प्रमाण-पत्रं अनिवार्यं कृतम् अस्ति। सः उक्तवान् यत् भारतसर्वकारेण अथवा राज्यसर्वकारेण एतादृशः कोऽपि दिशानिर्देशः न निर्गतः। विदेशयात्रायै एचपीवी-टीकाकरणं वा तस्य प्रमाण-पत्रं वा अनिवार्यं नास्ति।

एचपीवी-टीकाकरणं एका पूर्णतः ऐच्छिकी (स्वैच्छिकी) प्रक्रिया अस्ति। केवलं अभिभावकानां सूचितां सहमतिं (Informed Consent) प्राप्य एव पात्राणां किशोरीणां टीकाकरणं क्रियते। एतत् सुनिश्चितं क्रियते यत् टीकाकरणात् पूर्वं अभिभावकेभ्यः अस्य लाभाः आवश्यक्यः सूचनाश्च स्पष्टरूपेण दीयेरन् तथा च तेषां सम्मतिः स्वीक्रियेत। स्वास्थ्यविभागेन एषा सूच्यौषधिः मुख्यतया १४ तः १५ वर्ष-आयुवर्गस्य बालिकाभ्यः 'गर्भाशय-ग्रीवा-कर्कटरोग' (Cervical Cancer) निवारणाय निःशुल्कम् उपलब्धं कारिता अस्ति। एचपीवी-संक्रमणं भविष्ये गर्भाशय-ग्रीवा-कर्कटरोगस्य एकं प्रमुखं कारणं भवति, यदा तु वैज्ञानिक-अध्ययनानुसारं इयं सूच्यौषधिः एतादृशस्य गम्भीरस्य रोगस्य जोखिमं न्यूनीकर्तुं अतीव प्रभाविनी दृष्टा अस्ति।

सः सर्वान् अभिभावकान् जनसामान्यं च प्रार्थितवान् यत् ते कस्यापि प्रकारस्य 'अफवा' (मिथ्याप्रवादं) वा अपुष्टां सूचनां वा न विश्वसन्तु। तेन उक्तं यत् स्वास्थ्यविभागात् आधिकारिकस्रोतेभ्यश्च प्राप्तायां प्रामाणिक-सूचनायाम् एव विश्वासं कुर्वन्तु। एचपीवी-टीकाकरणस्य विषये अधिकसूचनायै अभिभावकाः स्वस्य निकटवर्ति-स्वास्थ्यसंस्थानेन, चिकित्साधिकारिणा अथवा आशा-कार्यकर्त्र्या सह सम्पर्कं कर्तुं शक्नुवन्ति।

# राज्यसर्वकारेण शून्य-छात्रसंख्यायुक्ताः अन्ये २४ विद्यालयाः पिहिताः, अधिसूचना निर्गता



**हिमसंस्कृतवार्ताः - शिमला।**

राज्यसर्वकारेण शून्य-नामाङ्कनयुक्ताः (Zero Enrollment) अन्ये २४ प्राथमिक-माध्यमिकविद्यालयाः पिहिताः। नूतन-शैक्षणिकसत्रे २०२६-२७ मध्ये अपि एतेषु विद्यालयेषु प्रवेशसंख्यायां वृद्धेः अभावात् शिक्षाविभागेन एते 'डी-नोटिफाई' (अधिसूचना-रहिताः) कृताः। शिमला-जनपदे सर्वाधिकं १६, लाहौल-स्पीति-क्षेत्रे ४, सिरमौर-जनपदे ३ तथा सोलन-जनपदे एकः विद्यालयः पिहितः। एतेषु विद्यालयेषु कार्यरताः कर्मचारिणः अधुना अन्येषु विद्यालयेषु स्थानान्तरिताः भविष्यन्ति। प्रदेशे अधुना यावत् न्यून-नामाङ्कनयुक्ताः प्रायः १२६० विद्यालयाः अन्येषु विद्यालयेषु विलीनाः (Merge) अथवा पिहिताः सन्ति।

### कस्मिन् जनपदे कियन्तः विद्यालयाः पिहिताः?

शिक्षासचिवस्य अधिसूचनानुसारं १९ सर्वकारीय-प्राथमिकविद्यालयेषु शिमला-जनपदस्य टिक्कर-कुमारसैन-ठियोग-सराहन बुशहर-नेरवा-कुपवी-रामपुर-सुन्नी-रंसर-जुब्बल-छौहारा इत्यादि शिक्षाखण्डेषु स्थिताः विद्यालयाः सम्मिलिताः सन्ति। सिरमौर-जनपदस्य राजगढ़-नारग-सुरला खण्डानां विद्यालयाः, सोलन-जनपदस्य कण्डाघाट-खण्डस्य च एकः विद्यालयः पिहितः अस्ति। पञ्च (५) माध्यमिक-विद्यालयेषु शिमलायाः सराहन बुशहर खण्डस्य एकः तथा लाहौल-स्पीति-क्षेत्रस्य उदयपुर-केलाङ्ग-क्षेत्राणां च चत्वारः (४) विद्यालयाः सम्मिलिताः सन्ति।

### शिक्षासचिवस्य वक्तव्यम्

शिक्षासचिवः राकेशकंवरः उक्तवान् यत् एतेषु विद्यालयेषु दीर्घकालात् एकोऽपि छात्रः नामाङ्कितः नास्ति, अतः एते विद्यालयाः पिहिताः। अधिसूचनायां स्पष्टीकृतं यत् एतेषां विद्यालयानां शिक्षकाणां, अ-शिक्षणकर्मचारिणां, भवनानां, अभिलेखानाम् अन्यसामग्रीणां च स्थानान्तरणं पूर्वमेव निर्गत-दिशानिर्देशानुसारं भविष्यति।

# अप्रैल-मासस्य हिमपातेन सेब-फलोद्यानानि नष्टानि, ओला-वृष्टिं रोद्धुं प्रयुक्तानि जालानि एव 'आपत्तिः' संजाताः



हिमाचलप्रदेशे अप्रैल-मासे जायमानः अयं असमय-हिमपातः उद्यानकृषकाणां कृते महती समस्या संजाता। शिमला-जनपदे रात्रौ निरन्तरा वृष्टिः हिमपातः च अभवत्। प्रातःकालात् अपि वर्षणक्रमः आसीत्। शिमलायाः रोहडू, रामपुरं, नारकण्डा, जुब्बल-कोटखाई, फागू, ठियोगः, कुफरी इत्यादिषु स्थानेषु वृष्ट्या सह करकापातः (ओलावृष्टिः) हिमपातः च अभवत्। नारङ्गसचेतनायाः मध्ये रोहताङ्ग-दर्रा सहितं भरमौर-पाङ्गी-शिखरेषु अपि हिमपातः जातः। काङ्गड़ा, कुल्लू, मण्डी, शिमला, सोलन-जनपदेषु बुधवासरे प्रचण्डवायोः करकापातस्य च सचेतना दत्ता अस्ति। एवं सति सेब-उद्यानपालकाः चिन्तिताः सन्ति, यतः इदानीं सेब-पादपेषु पाटलमुकुलः' (Pink Bud) कालः अस्ति।

पुष्पाणि करकापातात् रक्षितुं यानि जालानि (Nets) स्थापितानि आसन्, तेषु हिमस्य भारेण पादपानां शाखाः एव त्रुटिताः। उद्यानकृषि-विशेषज्ञा डॉ. सुदर्शना नेगी उक्तवती यत् यत्र पुष्पाणि विकसितानि सन्ति, तत्र हिमपातः वर्षा च हानिकारकः अस्ति। सा उद्यानपालकान् पादप-मूलेषु जलसञ्चयं रोद्धुं सूचितवती, यतः अधिक-आर्द्रतया पुष्पाणि पतितुं शक्नुवन्ति। कृषकाणां कृते अपि इयं वृष्टिः कष्टकरी अस्ति, विशेषतः कलाय-सस्यस्य (Peas) कृते। तथापि वार्ताकि (Tomato), गोभी, शिमला-मरीचिका, आर्द्रकम् (Ginger) सस्यानां कृते इयं वृष्टिः वरदानमिव अस्ति, परन्तु करकापातः एतानि अपि विनाशयति।

### वृष्ट्या भूस्खलनम्

निरन्तर-वृष्ट्या भूस्खलनस्य घटनाः अपि आरब्धाः। शिमला-नगरस्य 'चमियाणा' चिकित्सालयं प्रति गच्छति मुख्यमार्गे स्थाने स्थाने भूस्खलनं जातम्। अनेन अद्य प्रातः रोगिणः पादचारेण एव चिकित्सालयं गन्तुं विवशाः अभवन्। यद्यपि लोकनिर्माणविभागस्य (PWD) दलः मार्ग-बहाली-कार्ये संलग्नः अस्ति, परन्तु भूस्खलनस्य गुरुत्वं दृष्ट्वा मार्गस्य पूर्णतः परिष्कारे सम्पूर्णदिनं भवितुं शक्यते।

# शैक्षणिक-भ्रमणानि छात्रान् जीवन्त-इतिहासेन सह साक्षात् कारयन्ति- आचार्यः ललितकुमार अवस्थी



- **सरदारपटेल विश्वविद्यालयस्य मण्डी इत्यस्य इतिहास- विभागस्य शैक्षणिकदलं जीवाजी- विश्वविद्यालयात् प्रत्यावृत्तम्।**
- **जीवाजी-विश्वविद्यालय-भ्रमणम्- छात्रैः नवीनः अनुभवः सम्प्राप्तः।**
- **शैक्षणिक-यात्रया इतिहासस्य नवीनाः आयामाः उद्घाटिताः।**

हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा
सरदारपटेलविश्वविद्यालयस्य मण्डी इत्यस्य इतिहासविभागेन सहमतिज्ञापनम्' (MoU) इत्यस्य अन्तर्गतम् आयोजितस्य 'संकाय- विद्यार्थी- सांस्कृतिक- आदानप्रदान' तथा 'शैक्षणिक-भ्रमण' कार्यक्रमानुसारं ३१ सदस्यीयं दलं ग्वालियर- स्थित- जीवाजी- विश्वविद्यालयात् सफलतापूर्वकं प्रत्यावर्त्य मण्डीनगरं सम्प्राप्तम्। अस्मिन् अवसरे विश्वविद्यालयस्य कुलपतिः आचार्यः ललितकुमार अवस्थीवर्यः दलस्य स्वागतं कुर्वन् अकथयत् यत् एतादृशाणि शैक्षणिक-भ्रमणानि छात्राणां सर्वाङ्गीणविकासे अतीव सहायकानि भवन्ति। सः प्रतिपादितवान् यत् समकालीन- उच्चशिक्षायाः सन्दर्भे ज्ञानस्य वास्तिविकी सार्थकता तदैव सुनिश्चिता भवति, यदा तत् कक्षाणां सीमाभ्यः बहिः गत्वा प्रत्यक्षानुभव- संवाद- अन्तःसंस्थागत- सहभागितानां माध्यमेन विकसितं स्यात्।

इतिहाससदृशे विषये, यत्र अतीतस्य व्याख्या केवलं ग्रन्थेषु सीमिता न भवति, अपि तु स्थलेषु, अभिलेखेषु, स्थापत्येषु सांस्कृतिक-परम्परासु च निहिता वर्तते, तत्र एतादृशाः शैक्षणिक-प्रवासाः छात्रान् जीवन्त- इतिहासेन सह मेलयन्ति। जीवाजी- विश्वविद्यालयेन सह स्थापितोऽयं सहयोगात्मकमञ्चः भारतीय- उच्चशिक्षायां 'ज्ञान- सहभागिता (Knowledge sharing) इत्यस्य उत्कृष्टम् उदाहरणम् अस्ति, यत् राष्ट्रिय- एकतायाः, सांस्कृतिक-संवादस्य, बौद्धिक- समन्वयस्य च सुदृढीकरणाय महत्त्वपूर्णं पदम् अस्ति। ते छात्रान् स्वानुभवान् शोध-अध्ययनयोः उपयोक्तुं मार्गदर्शितवन्तः।

कार्यक्रमस्य संयोजकाः विभागाध्यक्षाश्च डा. राकेशकुमार शर्मा भ्रमणस्य विस्तृतं विवरणं दत्तवन्तः। ते उक्तवन्तः यत् अस्याः यात्रायाः समये छात्रैः जीवाजी- विश्वविद्यालयस्य विविध- शैक्षणिक- प्रशासनिक-संस्थानानाम् अवलोकनं कृतम्। एतेषु प्रशासनिक-भवनम्, केन्द्रीय- पुस्तकालयः, 'डॉ.ए. पी. जे. अब्दुल कलाम' केन्द्रीय- उपकरण- सुविधा, 'अटल- बिहारी- वाजपेयी' सभागारः तथा 'प्राचीन- भारतीय- इतिहास- संस्कृति- पुरातत्त्व- अध्ययनशालायाः' सर मार्टिमोर व्हीलर संग्रहालयः प्रमुखाः आसन्। अतिरिच्य, छात्रैः निकटवर्तिनां ऐतिहासिकस्थलानाम् अपि अध्ययनं कृतं, येषु मितावलीनगरस्य चतुष्षष्टि-योगिनी-मन्दिरम्, पडावली, बटेश्वरमन्दिरसमूहः, शनिचरा- मन्दिरम्, ग्वालियरदुर्गः, अशोककालीन-गुर्जर-अभिलेखः, सोनागिर-जैनमन्दिरं, पीताम्बरपीठं च समाविष्टानि सन्ति। अस्मिन् अन्तराले छात्रैः विविध- सङ्ग्रहालयानां सांस्कृतिक-धरोहराणां च प्रत्यक्षम् अध्ययनं कृत्वा ऐतिहासिक-ज्ञानं संवर्धितम्। भ्रमणसमये जीवाजी- विश्वविद्यालयस्य प्राचीन- भारतीय- इतिहास- संस्कृति- पुरातत्त्व- अध्ययनशालायाः विभागाध्यक्षः प्रो. शान्तिदेव सिसोदियामहोदयः छात्राणां मार्गदर्शनं कृतवन्तः। छात्राः तत्र आयोजितासु विविध- शैक्षणिक- सांस्कृतिक- गतिविधिषु अपि सक्रियां सहभागितां कृतवन्तः। विभागाध्यक्षेण जीवाजी- विश्वविद्यालयस्य कुलगुरूणां डॉ.राजकुमार- आचार्य- महोदयानां प्रो. शान्तिदेव- सिसोदिया- महोदयानां च प्रति सहयोगार्थं कृतज्ञता ज्ञापिता। अस्मिन् भ्रमणदले विभागाध्यक्षः डॉ.राकेशकुमारशर्मा, सहायक- आचार्यः डॉ.रामपालः, शोधार्थिनः वेदप्रकाश, राहुलकुमार, डोल्मा, जीवाजी-विश्वविद्यालयस्य च शोधार्थिनः राहुलकुमार, सामिनखान, राहुलबरैया, छात्रेषु सानूकुमारः, दीपक दीपांशुः, खुशबू, अनीशा, कल्पना, गौरवः, उमा भारती, लखवीरः, विक्रान्तः, मनीषा सहिताः २६ स्नातकोत्तर-छात्राः, ३ शोधार्थिनः, २ संकाय-सदस्याश्च सम्मिलिताः आसन्। एषः शैक्षणिकप्रवासः छात्राणां कृते ज्ञानवर्धकः प्रेरणादायी च सिद्धः जातः।

# अनुभवात्मक- अधिगमस्य दिशि अग्रसराणां वनस्पतिविज्ञानस्य विद्यार्थिनाम् अनुसंधानसंस्थानानां शैक्षणिकप्रस्थानम्



हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा। सरदार पटेल विश्वविद्यालयस्य मंडी इत्यस्य वनस्पतिविज्ञानविभागस्य स्नातकोत्तर- वनस्पतिविज्ञानस्य (एम. एससी. बॉटनी) दश छात्राणां दलं महत्त्वपूर्णाय शैक्षणिकभ्रमणाय देहरादून- हरिद्वारयोः प्रमुख- राष्ट्रीय- अनुसंधान- संस्थानेभ्यः गतम्। अस्मिन् दले समूहोऽयं भारतीय- रिमोट- सेंसिंग- संस्थानं (देहरादूनम्), वन- अनुसंधान- संस्थानं (देहरादूनम्), पतंजलि- अनुसंधान- संस्थानम् (हरिद्वारम्) सहितम् अन्य- प्रतिष्ठित- संस्थानानाम् अवलोकनं करिष्यन्ति। इस अस्य शैक्षणिकभ्रमणस्य मूलम् उद्देश्यं विद्यार्थिनां सैद्धांतिकज्ञानस्य व्यावहारिक- परिप्रेक्ष्ये रूपांतरणमस्ति। अस्य मुख्योद्देश्यं जैवविविधतायाः प्रलेखन-संरक्षणयोः समकालीनप्रविधिभिः छात्रान् परिचाययितुं विशेषज्ञैः सह च संवादमाध्यमेन तेषाम् अनुसन्धानपरकदृष्टेः विस्तारं कर्तुं वर्तते। अस्मिन् अवसरे विश्वविद्यालयस्य कुलपतयः प्रो. ललितकुमार अवस्थिमहोदयाः छात्रेभ्यः संकायसदस्येभ्यः च शुभाशायान् व्याहरन्तः अवदन् यत् समकालीन- उच्चशिक्षायाम् अनुभवात्मकाधिगमस्य विशिष्टं महत्त्वं विद्यते। एतादृश्यः शैक्षणिकयात्राः कक्षाप्रकोष्ठे अर्जितस्य सैद्धान्तिकज्ञानस्य वास्तविकजीवनस्य प्रयोगाणां च मध्ये सेतुबन्धकार्यं कुर्वन्ति। एताः न केवलं छात्राणां वैज्ञानिकावबोधं दृढयन्ति, प्रत्युत तान् नवोन्मेषि-अनुसन्धानाय अपि प्रोत्सहायन्ति। ते विश्वासं प्रकटितवन्तः यत् एषः प्रवासः छात्राणां बौद्धिकक्षितिजं विस्तारयन् तान् पादपविज्ञानस्य उन्नतपरिणामैः परिचेष्यति।

वनस्पतिविज्ञानविभागाध्यक्षः डॉ.लखवीरसिंहः अस्मिन् अवसरे छात्रेभ्यः शुभकामनाः प्रददन् उक्तवान् यत् एतादृशाः शैक्षणिक-उपक्रमाः छात्राणां सर्वाङ्गीणविकासे नितरां सहायकाः भवन्ति। अस्य शैक्षणिकदलस्य नेतृत्वं कुर्वन्तः विभागस्य सहायकप्राध्यापकः डॉ.जगदीप वर्मा अवदत् यत् एषः शैक्षणिकभ्रमणः विश्वविद्यालयस्य तस्याः सततप्रतिबद्धतायाः परिचायकः, यस्याः अन्वयः छात्रान् ज्ञानस्य व्यावहारिक- अनुसन्धानपरक- नवाचार- आयामैः सह संयोज्य राष्ट्रिय- वैश्विकस्तरेषु तेषां प्रतिस्पर्धात्मक- सामर्थ्यवर्धनं वर्तते। अस्मिन् दले कनिष्ठतन्त्रज्ञा भानुप्रिया, एम.एससी. चतुर्थसत्रस्य छात्राः अदितिः, अंकिता ठाकुरः, अनुप्रिया, कुसुम शर्मा, लोकेश्वरी, मोहिनी शर्मा, प्रियंका, सौरवः, तुशाली, देवी सिंहः च सक्रियतया सहभागित्वं निर्वहन्ति।

# HP WEATHER -लाहौल-स्पीति क्षेत्रे बस-सेवायाः स्थगनम्, वृष्टि-हिमपाताभ्यां कुल्लू- जनपदेऽपि स्थितिः विकृता

हिमसंस्कृतवार्ताः - कुल्लूः। कुल्लू-लाहौल-स्पीति- जनपदयोः ऋतुना पुनः स्वरूपं परिवर्तितम्। विगतरात्रेः उभयोः जनपदयोः वर्षायाः हिमपातस्य च क्रमः आरब्धः। लाहौल-स्पीति-क्षेत्रस्य चर्चां कुर्मश्चेत् अटल-कन्दरायाः उत्तर-प्रवेशद्वारात् आरभ्य सिस्सू, कोकसर, ग्रांफू इत्यादिषु ग्रामीणक्षेत्रेषु उच्चशिखरेषु च निरन्तरं हिमपातः भवति। जनपदे हिमपातकारणात् बस-सेवायाः सञ्चालनं स्थगितम्। कुल्लू-जनपदे धुन्धी-क्षेत्रे अटल-सुरङ्गायाः दक्षिण-प्रवेशद्वारे च हिमपातः प्रारब्धः। अधुना यावत् द्वि-त्र्यङ्गुलोन्मितः (2-3 inches) हिमः पतितः। राष्ट्रियमार्गे (NH-305) 'जलोड़ी जोत' स्थाने अपि हिमपातः आरब्धः, येन वाहनानां गमनागमने बाधा उत्पन्ना। लाहौल- स्पीति-क्षेत्रे प्रायः सर्वेषु मार्गेषु बस-सेवायाः चक्राणि स्थगितानि। कुल्लू-जनपदे २० मार्गाः अवरुद्धाः सन्ति, ४० तः अधिकाः विद्युत्-परिवर्तकाः (Transformers) अपि विफलाः जाताः।



प्रभांशुपाण्डेयः

## शिवस्तुतिः

मन्दारपुष्पान्वितशूलहस्तं
गलप्रदेशे विषनागराजम्
सुरेशनाथं जनपापहारं
यतीन्द्रनाथं तमहं भजामि ।।१।।

रमेशमोहापहरं सुरेशं
करोतु नित्यं ममदुःखनाशम्
महानमूर्तिं सुखदं महेन्द्रं
यतीन्द्रनाथं तमहं भजामि ।।२।।

जटासु गङ्गारमणीयधारं
शशिप्रभाशोभितभालरुद्रम्
शरीरभस्मान्वितदिव्यरूपं
यतीन्द्रनाथं तमहं भजामि ।।३।।

करालरूपेन्द्रललामभालम्
अनाथनाथं गलसर्पमालम्
निधाय वक्षे नितरां शिवेशं
यतीन्द्रनाथं तमहं भजामि ।।४।।

कराग्रढक्कां मनसाधिराजं
विदग्धज्ञानं भुवनेश्वरं तम्
विशालकायामधिराजविश्वं
यतीन्द्रनाथं तमहं भजामि ।।५।।

# हिमाचलप्रदेशे विलम्बित-अतिरिक्तराशेः (Arrear), चिकित्सा-विधेयकानां च भुक्तिः शीघ्रं भविष्यति, वित्तविभागेन शीघ्रनिस्तारणाय निर्देशाः दत्ताः

हिमसंस्कृतवार्ता:शिमला। हिमाचलप्रदेशस्य विभिन्नेषु विभागेषु, निगमेषु, बोर्डेषु, विश्वविद्यालयेषु च कार्यरत-कर्मचारिणां निवृत्त-पेंशनधारिणां च कृते इयं हर्षस्य वार्ता अस्ति। ये कर्मचारिणः पेंशनधारिणः च गम्भीररोगैः ग्रस्ताः सन्ति, तेषां विलम्बित-अतिरिक्तराशेः (Arrear) तथा चिकित्सा-विधेयकानां (Medical Bills) भुक्तिः अधुना शीघ्रं भविष्यति। अस्मिन् विषये सर्वकारेण विस्तृतं कार्यालय-आदेशं निर्गत्य प्रक्रिया सरला समयबद्धा च कर्तुं निर्देशाः दत्ताः। कतिपयसमयात् बहवः कर्मचारिणः निवृत्ताः च संशोधित-वेतनमानस्य, उपदानस्य (Gratuity), अर्जित-अवकाश-नगदीकरणस्य (Leave Encashment), रूपान्तरणस्य (Commutation) च अतिरिक्तराशिं प्राप्तुं उच्चन्यायालये याचिकाः प्रविष्टवन्तः आसन्। एते सर्वे विषयाः 'मधु देश्टा बनाम राज्य' इत्यादिभिः याचिकाभिः सह सम्मिलिताः कृताः।

न्यायालयस्य श्रवणकाले याचिकाकर्तॄणां अधिवक्ता न्यवेदयत् यत् बहवः याचिकाकर्तॄणः कर्कटरोगात्, हृदयरोगसदृशेभ्यः गम्भीररोगेभ्यः च पीडिताः सन्ति, आर्थिककष्टकारणात् तेषाम् उपचारः कठिनः जातः अस्ति। अस्मिन् विषये राज्यसर्वकारेण न्यायालये सूचितं यत् ईदृशेषु प्रकरणेषु अतिरिक्तराशेः अन्यदेयराशीनां च भुगतानार्थं वित्तविभागेन विशेषानुमतिः प्रदत्ता। न्यायालयः राज्यसर्वकारं, बोर्डान्, निगमान्, विश्वविद्यालयान् च आदिष्टवान् यत् गम्भीररोगग्रस्त-कर्मचारिणां पेंशनधारिणां च प्रकरणानि प्राथमिकताधारेण निस्तारणीयानि, भुक्तिः च शीघ्रं करणीयम्।




सहैव इदमपि स्पष्टीकृतं यत् भविष्ये आगमिष्यत्सु ईदृशेषु सर्वेषु प्रकरणेषु अपि एषैव प्रक्रिया अनुसरिष्यते। अस्मिन्नेव क्रमे विद्युत्-बोर्ड-प्रबन्धनेन एकं पत्रं निर्गत्य कथितं यत् येषु प्रकरणेषु न्यायालयस्य स्पष्टादेशाः सन्ति, तेषु अतिरिक्तराशेः भुक्तिः तत्क्षणं भविष्यति। यदि कश्चन कर्मचारी पेंशनधारी वा गम्भीररोगस्य कारणं दर्शयित्वा आवेदनं करोति, तर्हि सम्बन्धितः अधिकारी मुख्यचिकित्साधिकारिणः चिकित्सा-प्रमाणपत्रस्य आधारेण प्रकरणं शीघ्रं प्रक्रियां नेष्यति। अतिरिक्तराशेः गणना 'विद्युत् बोर्ड (संशोधित वेतन) विनियमाः २०२२' इत्यनुसारं भविष्यति।

ईदृशेषु प्रकरणेषु चिकित्सा-प्रतिपूर्ति-विधेयकाणि अपि प्राथमिकताधारेण निस्तारयिष्यन्ते। यदि प्रपत्रेषु कापि न्यूनता दृश्यते, तर्हि दिनत्रयस्य अन्तरे सूचितं करणीयं भविष्यति, पुनः प्रपत्रसमर्पणानन्तरं च शीघ्रं कार्यान्वयनम् आवश्यकम्। बोर्ड-प्रबन्धनेन उक्तं यत् अस्य मुख्यमुद्देश्यं रोगग्रस्त-कर्मचारिणां पेंशनधारिणां च समयबद्ध-आर्थिक-सहायता प्रदानं अस्ति, येन उपचारे कोऽपि बाधा न भवेत्। एतदर्थं वित्त-लेखा-विभागाय अपि भुक्तिः शीघ्रं कर्तुं निर्देशाः दत्ताः।

## लौकिकन्यायकोशः (४३४)

## " प्रासादवासिन्यायः"

कश्चन गृहस्थ प्रथमे अट्टे क्वचित् अधः अपि आगच्छति | अधिककालं यावत् प्रासादभागे वसति इति कारणेन जनाः तं सर्वदा प्रासादवासिनमेव कथयन्ति | एवं केचन् भूवासिनः,केचन् अरण्यवासिनः भवन्ति खलु |

एवमेव वर्णेषु केचन् अनुनासिकाः, केचन मुखवचनाः, केचन उभयवचनाश्च भवन्ति इति पातञ्जलमहाभाष्ये १-१-८ उपवर्णितम् अस्ति |

डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य काः विचित्राः वार्ताः श्रुताः त्वया?

**नन्दिनी-** बेङ्गलूरु-नगरे एकया तन्त्रज्ञान-कार्यकर्त्र्या स्व-मातापितरौ कार्यालयम् आनीतौ।
तत्र मातापितृभ्याम् कार्यालयस्य अन्तः एव भोजनं खादितम्।
एषा घटना अन्तर्जाले बहुभिः जनैः दृष्टा।

**काव्या-** अहो, भारतीय-पितॄणां व्यवहारः अतीव रोचकः अस्ति!
अहम् अपि अन्याम् अरण्य-वार्तां पठितवती अस्मि।
राजस्थान-राज्ये वनविहारे पर्यटकमार्गे एकः व्याघ्रः दृष्टः।
परन्तु तत्र बहुभिः वाहनैः मार्गः अवरुद्धः।
तेन व्याघ्रेण गन्तुम् अतीव कष्टम् अनुभूतम्।

**नन्दिनी-** तत् तु अतीव दुःखकरम्! वन्यजीवानां शान्तिः मानवैः न भञ्जनीया।
तन्त्रज्ञान-क्षेत्रात् अन्या वार्ता मया श्रुता।
एकस्याः महा-संस्थायाः संस्थापकेन ग्रामान् प्रति पुनरागमनाय आह्वानं कृतम्।
तेन उक्तम् यत् नगरेषु सङ्कुलता वर्धिता, अतः ग्रामेषु एव विकासः करणीयः।

**काव्या-** सत्यम् उक्तम् तेन। ग्रामाणां विकासः आवश्यकः एव।
अहं कृत्रिम-बुद्धेः विषये एकां नूतनां वार्तां ज्ञातवती अस्मि।
एकेन तक्षकेन पञ्चचत्वारिंशत्-निमेषाणां कार्याय नवशतरूप्यकाणि स्वीकृतानि।
जनैः विचारितं यत् कृत्रिम-बुद्ध्या तक्षकस्य कार्यं कदापि न हृतं भविष्यति।

**नन्दिनी-** आम्, हस्त-कौशलस्य मूल्यं सर्वदा भविष्यति।
अद्यतनाय एतावत् एव। धन्यवादः।





हिमसंस्कृतवार्ता

असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

## संस्कृतं मधुरं सदा -२४

**गुरुर्ब्रह्मा गुरुर्विष्णुर्**
**गुरुर्देवो महेश्वरः ।**
**गुरुः साक्षात्परं ब्रह्म**
**तस्मै श्रीगुरवे नमः ।।**

वस्तुतः मनुष्यस्य कृते सन्मार्गदर्शकः कश्चन गुरुः अत्यन्तम् आवश्यकः। अस्मिन् कल्मषोपेते युगे तादृशः सद्गुरुः अत्यन्तं दुर्लभतां गतोऽस्ति । तस्मात् सर्वेषां हृदये, सर्वत्र च विद्यमानः परब्रह्म परमात्मा हि समेषां सद्गुरुः वर्तते, तस्य नित्यम् अन्वेषणञ्च अस्माभिः मनुष्यैः कर्तव्यम् । गुरोः प्राप्तिः, तस्य सान्निध्यञ्च मनुष्यस्य परमकल्याणाय भवति । वस्तुतस्तु जगति सर्वेषां गुरुरेक एव, यश्च परमात्मा आख्यायते - 'कृष्णं वन्दे जगद्गुरुम्' इति । यदा कस्यचन अन्तःकरणे स्वश्रेयसः, कल्याणस्य, उद्धारस्य वा इच्छा जागरिता भवति तदा सः आत्मानं भगवतः शिष्यं मन्यते ; भगवतः शरणागतो भूत्वा शिक्षां प्रार्थयते - 'शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्' इति गीतावचनम् । गीता बाह्यविधिषु, बाह्यपरिवर्तने च तावत् आदरभावं न दर्शयति, यावच्च अन्तर्भावे, विवेके, बोधे, जिज्ञासायां, त्यागे च आदरं दर्शयति । यतोहि गीताया उपदेशः सार्वभौमः, न वा कमपि विशेषसम्प्रदायं, व्यक्तिं वा आलम्ब्य भगवता कृत उपदेशोऽयं, प्रत्युत मानवमात्रस्य कृते प्रदत्त उपदेशो वर्तते ।

यदा कस्यचन अन्तःकरणे तीव्रजिज्ञासा, श्रद्धा, भक्तिः, विश्वास इत्यादिभावः समुद्भवेत् तदा मनुष्यो विना केनापि सम्बन्धेन अन्तःकरणे स्वतःस्फुर्ततया जागरितं स्वोपदेशं स्वीकुर्यात् - 'श्रद्धावांल्लभते ज्ञानम्' इति। तात्पर्यं यत् ज्ञानन्तु स्वकीयया जिज्ञासया, लगनतया हि सम्भवति, न वा केवलं गुरोः स्वीकरणमात्रेण । स्वकीयोद्धारस्तु स्वयमेव कार्यः - 'उद्धरेदात्मनात्मानम्' इति ।

वास्तविकतया भगवान् हि सर्वेषां गुरुः, यच्च उपर्युक्तम् । यतोहि भगवता रचिते संसारेऽस्मिन् यस्मादपि ज्ञानप्रकाशादिकम् उपलब्धं भवति, तत्तु भगवत्तो हि प्राप्तवस्तु स्यात् - 'अहमादिर्हि देवानां महर्षीणां च सर्वशः' इति । पूर्वं परम्परया बहवः सिद्धा गुरवः सञ्जाताः अस्मिन् भारते, भूतले च ।परन्तु अस्मिन् घोरकलिसमये न सद्गुरवः अपितु धर्मनाम्ना वञ्चकाः, निन्दकाः, क्रूरा वा हि सर्वत्र उपलभ्यन्ते । कथञ्चित् कोटिषु एक एकः सिद्धगुरुः स्याद्वा न वा, शङ्केति । गुरुलक्षणं महद्भवति । सज्जनस्य दृष्टिः, कर्म, भक्तिः, ज्ञानम् इत्यादिकं सर्वं सदैव एकमात्रं भगवदभिमुखं हि भवति । मानवता, सहृदयता, समदर्शिता, प्रेम, आत्मीयता इत्यादिको भावो गुरुलक्षणे अवलोक्यते इति, शुभम्।